कतावच्छेदकमनुगतं सम्भवतीति हन्त जन्यत्वमनुगतमस्त्यतो बाधकं विना न सुच्यते इति, निरस्तम्। ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना पक्षधर्म्मव्याप्तिपर्य्यवसायितत्वेन बाधकत्वादिति मैवम् निरुपाधित्वेन सहचारावसायस्य साधकं बाधकं च विना साधारणत्वे व्याप्तिसंशयाधायकत्वात्। अन्यथा साध्यं पक्षातिरिक्त एव सुखं दुःखसंभिन्नमेवेत्यादि व्याप्तिग्रहस्य कार्य्यकारणभावग्राहकबाधकत्वे तत्संशायकत्वे वा कारणानुमानोच्छेदनिरीहं जगज्जायेत। तस्माद्यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोः कार्य्यकारणभावो बलवता बाधकेनापनीयाते, न चात्र तदस्ति विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याभावात्। मव्यास्तु कार्य्यं कर्त्तृजन्यमिति व्याप्तितोऽशरीरनित्यज्ञानकर्त्तुरुपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धाने न तु तां विना प्रतियोग्यनुपस्थितौ विरोधोऽनिरूपणात् तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिञ्चित्करमेव। अतएव पक्षधर्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तं विरोधिप्रतियोगिसिद्ध्यसिद्धिपराहतत्वादिति

स्यादेतत् अस्तु शरीरजन्यत्वमुपाधिः न च पक्षेतरत्वरूपविपक्षमात्रव्यावर्त्तकविशेषणत्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वानिश्चयाच्च नोपाधित्वं, चेष्टेतरकार्य्येषु शरीरव्यापारद्वारैव कर्त्तुः कारणत्वात् न हि शरीरविनाकृतः कर्त्ता शरीरक्रियां घटादिकं वा जनयति। न च यत्सहकृतं यज्जनकम् तेन विना तज्जनकम् अतोऽस्माच्छरीराज्जन्यमेव कर्त्तृजन्यमिति साध्यव्यापकत्वनिश्चयात्। पक्षेतरत्वादौ च विपक्षबाधकाभावान्न साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे वीजम्। अत एव बाधोन्नीतं वह्नीतरत्वं वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात्। न च साधनविशेषितत्वमपि, जन्यत्वं प्रागभावप्रतियोगित्वं शरीरजन्यत्वञ्च शरीरकारणवत्त्वमन्यानिरुक्तेः इतरपदसमभिव्याहारेण जन्यपदादितरकारणस्यैव प्रतीतिस्तदर्थत्वकल्पनादिति विधौ वच्यते। अतएव शरीरिकर्तृकत्वमुपाधिः शरीरसहकृतस्यैव कर्त्तुः कारणत्वात् व्याप्यव्यापककोट्योरनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात्। शरीरिकर्तृकत्वसकर्तृकत्वयोर्न व्याप्तिग्रह इति चेन्न विशिष्टाविशिष्टभेदेन व्याप्यव्यापकभावाविरोधात्। अत एव जन्यत्वे कारणजन्यत्वमनुमीयत इति, मैवं कर्त्तुर्हि शरीरसहकारिता किं घटादौ कर्त्तव्ये कार्य्यमात्रे वा स्वकार्य्ये वा आद्ये कर्त्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्त्तुः कार्य्यमात्रकरणे। द्वितीये च कार्य्यमात्रं कर्त्तृजन्यमिति न त्वया स्वीक्रियते स्वीकारे वा शरीराजन्यमपि कार्य्यं कर्त्तृजन्यमिति साध्याव्यापकत्वम्। तृतीये तु न स्वजन्यत्वं स्वजन्यतावच्छेदकमात्माश्रयात्। तथापि यत्र कर्तृत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वं तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन सन्दिग्धोपाधित्वं वेति चेन्न लाघवेन बाधकं विना कर्तृजन्यत्वे सति जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात् तथा च शरीरजन्यत्वं न सकर्तृकत्वव्यापकं घटादौ त्वार्थः समाजः,घटत्वेन शरीरजन्यत्वनियमात् न तु व्यापकत्वप्रयुक्तो मानाभावात्, शरीरजन्यत्वं न सकर्तृकत्वव्यापकं तद्व्याप्यजन्यत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् हस्तादिनापि कर्त्तृत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात् साक्षात्प्रयत्ननिश्चेयजन्यत्वस्य साधनव्यापकत्वाच्च। शरीरिकर्त्तृकत्वमपि नोपाधिः जन्यमात्रे कर्त्तुः शरीरसहकारिताविरहात्। अथ यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरटङ्कि तथा च कर्त्तृविशेषशरीरजन्यविशेषयोः कार्य्यकारणभावनियमात् कर्त्तृमात्रशरीरजन्यमात्रयोरपि तथाभावः तथा च शरीरजन्यत्वं कर्त्तृतावच्छेदकमिति भवत्युपाधिः। नचैवं घटवच्छरीरजन्यत्वं सकर्त्तृकत्वव्याप्यं न व्यापकमपीति वाच्यं उभयसिद्धसकलसकर्त्तृत्ववृत्तित्वेन साध्यव्यापकतानिश्चयात् जन्यत्वेऽपि सकर्त्तृकत्वव्यापकत्वग्राहकमस्तीति चेत्तर्हि उभयत्र ग्राहकसाम्ये विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन सन्दिग्ध उपाधिर्व्याप्यत्वासिद्धिर्वा। हेतुव्याप्यतासंशयाधायक एव सन्दिग्धोपाधिः न च साध्यव्यापकत्वे साधनाव्यापकत्वे वा, उभयथैवासन्देहात्। न च वाच्यं शरीरजन्यत्वयोरन्वयव्यतिरेकज्ञाने जन्यत्वसकर्तृकत्वयोस्तद्ग्रह आवश्यक इति लाघवात् तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययोः हेतुसाध्ययोरन्वयव्यतिरेकज्ञानात् शरीरजन्यत्वानवगमेऽपि भवतीति विनिगमकमिति, यतो न कर्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रहः कर्तृमात्रस्य व्यतिरेकाभावात्। किन्तु विशेषयोरन्वयव्यतिरेकेण कार्य्यकारणभावेन वा सामान्ययोस्तथात्वग्रहस्तौ च तुल्यावे-